शस्य दण्डः कार्य्यः प्रमाणतः । ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विश” इति “षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् । तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वेति” च मनुः । “जनान्ते स्याज्जनान्तिकमिति” सा०द० ।

**अन्तिकतम** त्रि० अतिशयेनान्तिकः अतिशायने तमप् । अत्यासन्ने वेदे तु “तादेश्चेति” तिकलोपे अन्तमोऽप्युक्तार्थे ।

**अन्तिकाश्रय** पु० अन्तिकं समीपम् आश्रयते आ+श्री–अच् । निकटस्थे, अवलम्बनस्थाने च ।

**अन्तितस्** अव्य० अन्तिक+तसिल् कलोपः अन्तिशब्दाद्वा तसिल् । अन्तिके इत्यर्थे “नकिष्टं घ्नन्त्यन्तितोनदूरादिति” ऋ० २,२७,१३, “अन्तितः अन्तिकादिति” भा० ।

**अन्तिम** त्रि० अन्ते भवः अन्त+डिमच् । अन्तभवे, चरमे च । “अजातमृतमूर्खाणां वरमाद्यौ नचान्तिमः । सकृद्दोषकरावाद्यावन्तिमस्तु पदे पदे” हितो० ।

**अन्तिवाम** त्रि० अन्ति अन्तिके वामं वननीयं धनमस्य । निकटस्थधने ‘अन्तिवामा दूरे” इति ऋ० ७,७७,४ । ‘अन्ति अस्मदन्तिके वामं धनं यस्याः सान्तिवामेति” भा० ।

**अन्तेवसत्** पु० अन्ते निकटे विद्याग्रहणाय वसति वस–शतृ ७त० अलुक्समा० । शिष्ये अन्तेशब्दस्य पृथक्स्थितावपि तत्समभिव्याहारमात्रेण तदर्थता । “वसन्निवान्ते विनयेन जिष्णुः” किरा० ।

**अन्तेवासिन्** पु० अन्ते निकटे विद्याग्रहणाय वसति वस–णिनि ७त० अलुक्समा० । शिष्ये “याज्यान्तेवासिनोर्वापि न त्वन्यत इति स्थितिरिति” मनुः “कलापिवैशम्पायनान्तेवासिभ्यश्चेति” ‘आचार्य्योपसर्जनान्तश्चान्तेवासीति” च पा० । “वामदेवान्तेवासी तदाश्रमवासीति” दशकु० । ग्रामादेरन्तेवासिनि चाण्डालादौ त्रि० ।

**अन्तोदात्त** न० अन्ते उदात्तः स्वरो यस्य । अन्तोदात्तस्वरयुक्ते पदे “पथिमथोः सर्व्वनामस्थाने” पा०सूत्रे ‘सर्व्वनामस्थाने किम् ? ज्योतिष्मतः पथो रक्षेति उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदमिति” सि०कौ० । अन्ते अन्तावयवे उदात्तः । यादृशसमुदायस्य अन्त उदात्तः तादृशे समुदाये ‘कर्षात्वतो घञोऽन्त उदात्त” इत्यधिकारे विहिते अन्तोदात्तस्वरे, कार्षःपाक इत्यादि । ‘धातोः” पा० अन्तोदात्तः । ‘गोपायतन्न” इति सि०कौ० । “फिषोऽन्त उदात्त” इत्यधिकारे शान्तनवाचार्य्यप्रणीतसूत्रैः प्रातिपदिकस्यान्त उदात्तः । तानि च सूत्राणि सि०कौ० उत्तरार्द्धे ५५१, पृष्ठादौ उपात्तानि । तादृशसूत्रोपात्तानां प्रातिपादिकानामन्तोदात्तता बोध्या ।

**अन्त्य** त्रि० अन्ते पर्य्यन्ते वसतीति अन्त+यत् । चाण्डाले । “अन्त्यादपि वरं धर्म्मं स्त्रीरत्नं दुष्कुलादपीति” मनुः “अन्त्यश्चण्डाल” इति कुल्लू० । म्लेच्छे, चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्छति” नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकामिति” ‘नान्त्यो न विकलेन्द्रिय” इति च मनुः । “अन्त्यश्चण्डालादिरिति” “नक्षत्रवृक्षनदीम्लेच्छपर्वतनामिकामिति” च कुल्लू० । म्लेच्छानां सर्व्वापकर्षान्तभवत्वात्तथात्वम् । अवसानभवे, “जायायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणीति” मनुः ‘नानावीजेष्वन्त्य एव सामर्थ्यात्” कात्या० २,४,१०, “असह्यपीड़ं भगवन् ! ऋणमन्त्यमवेहि मे” इति “विससर्ज्ज तदन्त्यमण्डनमिति” च रघुः “क्रियतां कथमन्त्यमण्डनमिति” कुमा० । अवसानञ्च दैशिकं कालिकञ्च उक्तोदाहरणे यथायथं बोध्यम् अन्ताय परिच्छेदाय हितः यत् । परिच्छेदकारके वैशेषिकोक्ते विशेषपदार्थे “अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तित” इति भाषा० प्रलये परमाणूनां गगनादीनाञ्च अन्यस्य विशेषकारकस्याभावात् विशेषस्यैव परिच्छेदकरत्वमिति तस्यान्त्यत्वम् । मुस्तायाम् स्त्री । अन्तिमे वस्तुनि त्रि० । यथा नक्षत्राणां मध्ये रेवती, राशीनां मध्ये मीनः, वर्णानां मध्ये हकार इत्यादि । संख्याभेदे न० “जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तरा संख्ये”ति भास्कराचार्य्योक्ते परार्द्धशतभागे । गणितशास्त्रोक्ते सर्वस्य वामस्थिताङ्के “स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्न” इति लीला० । लग्नावधिद्वादशराशौ पु० षष्ठेऽष्टमेऽन्त्ये भुविचेन्थिहेश इति नील०ता० । “त्रिकोणाष्टकयुक्तान्त्यग्रहायद्वत् फलं तथा इति”ज्योति० । अन्तेभवः दिगा० यत् । सिद्धान्तशिरोमण्युक्तायां चरजीवया युतोनायां त्रिज्यायाम् स्त्री । यथा “क्षितिज्ययैवं द्युगुणश्च सा हृतिश्चरज्ययैवं त्रिगुणोऽपि सान्त्यका” । ‘द्युज्यैव क्षितिज्ययोत्तरगोले युता, याम्ये रहिता हृतिर्भवति । एवं त्रिज्या चरजीवया युतोनान्त्या स्यात् । अत्रोपपत्तिः । अत्र गोलेऽहोरात्रवृत्तक्षितिजसंपातयोर्बद्धं यत् तदुदयास्तसूत्रम् । एवमुन्मण्डलसंपातयोर्बद्धं तदहोरात्रवृत्तव्याससूत्रम् । तदुदयास्तसूत्रयोरन्तरं सर्व्वत्र कुज्या । अथ याम्योत्तरवृत्तसंपातयोर्बद्धं तत् तन्मितं तस्य व्याससूत्रम् ।